थ्यीकरणात् मृतसमः। अतएवाह दक्षः "जीवन्तो मृतकास्त्वन्ये य आत्मम्भरयो नराः" ।

**जीवपति** स्त्री जीवः जीवन् पतिरस्याः सपूर्वत्वात् वा न न ङीपौ जीवद्भर्तृकायां सधवायां "स्त्रीचैतदास्थाय लभेत सौभगं श्रियं प्रजां जीवपतिर्यशोगृहम्" भाग० ६।१८।२० वा कप् जीवपतिकादयोऽप्यत्र ।

**जीवपत्नी** स्त्री जीवः जीवन् पतिर्यस्याः सपूर्वत्वात् नः ङीप् च । जीवत्पतिकायां सधवायाम् "ब्राह्मण्याश्च वृद्धायाः जीवपत्न्याः जीवप्रजाया अगारे एतां रात्रिं वसेत्" । "वाचं विसृजेत् जीवपत्नीं प्रजां विन्देयेति" आश्व० गृ० १।७।२१।२१ । "तमेतमवेक्षितनक्षत्रं वीरसूर्जीवस्त्रः जीवपत्नीति ब्राह्मण्यो मङ्गल्यादिभिर्वाग्भिरुपासीरन्" सं०त० गोभिलः ।

**जीवपत्रप्रचायिका** न० जीवस्य जीवपुत्रकस्य पत्राणि प्रचीयन्तेऽस्याम् "नित्यं क्रीड़ाजीविकयोः" पा० स० । क्रीड़ायां प्र+चि–भावे ण्वुल् । उदीचां क्रीड़ाभेदे । "जीवपत्रप्रचायिका उदीचां क्रीड़ा" सि०कौ० । प्राचां क्रीड़ायां तु पा०सूत्रे प्राचामिति विशेषणात् न पूर्वपदस्याद्युदात्तता किन्तु तत्पुरुषे प्रकृतिस्वरः ।

**जीवपुत्र** पु०जीवः जीवकः पुत्र इव हर्षहेतुत्वात् ।(जियाँपोती) १वृक्षभेदे । जीवः जीवन् पुत्रो यस्याः । २जीवत्सुतायां स्त्रियां "सा जीवपुत्रा सुभगा भवत्यमरवर्णिनी" हरिवं० १२८अ० । जीववत्सादयोऽप्यत्र । "काकवन्ध्या च या नारी मृतवत्सा च या भवेत् । बहुपत्या जीववत्सा सा भवेन्नात्र संशयः" कालीस्तवः । "मृतप्रजा जीवपुत्रा धनेश्वरी" भाग० ६।१८।२१ । ३तादृशपुरुषे पु० "कच्चित् पुत्रा जीवपुत्राः सुमस्यक" भाग० उ० २६ ।

**जीवपुत्रक** पु० जीवयतीति जीव–क जीवः पुत्र इव हर्षहेतुत्वात् इवार्थे कन् ।(जिँयापोती) वृक्षभेदे । शब्दर० ।

**जीवपुष्पा** स्त्री जीवयतीति जीव–णिच् अच्–जीवं जीवकं पुष्पं यस्याः । वृहज्जीवन्तीवृक्षे राजनि० । जीवः जन्तुः पुष्पमिव ।२जन्तुरूपपुष्पे न० । "अस्माकं शिविरे तावन्निशिताः शस्त्रपाणयः । शत्रूणां जीवपुष्पाणि विचिन्वन्तु नगेष्विव" रामा० सु०४२अ० ।

**जीवप्रिया** स्त्री जीवं प्रीणाति प्री–क ६त० ।१हरीतक्याम् । राजनि० । ६त० । २जीववल्लभे त्रि० ।

**जीवभद्रा** स्त्री जीवानां भद्रं यस्याः ५ब० । जीवन्तीलतायां राजनि० । ६त० । जीवकुशले न० ।

**जीवमन्दिर** न० ६त० । शरीरे राजनि० तस्य जीवभोगायतनत्वात्तथात्वं जीवगृहादयोऽप्यत्र ।

**जीवमातृका** स्त्री ६त० "कुमारी धनदा नन्दा विमला मङ्गला बला । पद्मा चेति च विख्याताः सप्तैता जीवमातृकाः" विधानपारिजातोक्ते कुमार्य्यादौ मातृकासप्तके ।

**जीवयाज** पु० जीवैः पशुभिर्याजः याजनम् यज–णिच् भावे अच् । पशुभिर्याजने । "जीवयाजं यजते सोमपादिवः" ऋ०१।३१।१५। अस्य भाष्ये "याजयतेर्घञ् णेरनिटीति णिलोपस्याचः परस्मिन्निति स्थानिवद्भावात् चजोः कुघिण्ण्यतोरिति कुत्वाभाव इति" यदुक्तं तत् प्रामादिकं याजयतेर्हलन्तत्वाभावात् चजोऽप्रसक्तेः "एरच्" पा० इवर्णान्तादचः एव प्रसक्तेश्च ।

**जीवयोनि** स्त्री जीवा जीवनवती योनिः । सजीवजन्तौ "तिर्य्यङ्मनुष्यविबुधादिषु जीवयोनिषु" भाग०३।६।२० ।

**जीवरक्त** न०जीवोत्पादकं रक्तम् शाक०त० । स्त्रीणामार्त्तवे शोणिते तस्य गर्भोत्पादकत्वेन तत्रस्थजीवोत्पादकत्वं यथाह सुश्रुतः "आर्त्तवं शोणितं त्वाग्नेयमग्नीषोमीयत्वाद्गर्भस्य,पाञ्चभौतिकञ्चापि जीवरक्तमाहुराचार्य्याः विस्रता द्रवता रागः स्पन्दनं लघुता तथा । भूम्यादीनां गुणा ह्येते दृश्यन्ते चात्र शोणिते" ।

**जीवला** स्त्री जीवं जीवनं लाति सेवनात् ला–क । सैंहलीलतायां राजनि० ।

**जीवलोक** पु० जीवानां लोकः भोगसाधनम् । १संसारे "माता पिता गुरुजनः स्वजनो ममेति मायोपमे जगति कस्य भवेत् प्रतिज्ञा । एको यतो व्रजति कर्म पुरःसरोऽयं विश्रामवृक्षसदृशः खलु जीवलोकः । सायं सायं वासवृक्षं समेताः प्रातः प्रातस्तेन तेन प्रयान्ति । त्यक्त्वान्योन्यं तञ्च वृक्षं विहङ्गास्तद्वत् तद्वज्ज्ञातयो ज्ञातयश्चेति" । "ममैवांशो जीवलोके जीवभूतः सनातनः" गीता । "जीवलोके संसारोपभोगार्थम्" श्रीधरः । कर्म० । २जीवरूपे जने च "महागुणं हरति हि पौरुषेण तदा वीरो जीवति जीवलोके" भा०व०३४अ० । "आलोकमर्कादिव जीवलोकः" रघुः ।

**जीववल्ली** स्त्री जीवयतीति जीव–णिच्–अच् कर्म० । क्षीरकाकोल्याम् राजनि० ।

**जीववृत्ति** स्त्री जीव एव वृत्तिः । पाशुपाल्ये हेमच० । तत्र जीवरक्षादिना वैश्यादेर्वृत्तिरिति तस्य तथात्वम् । जीवे वृत्तिः स्थितिरस्य । २जीवनिष्ठे गुणादौ त्रि०